ष्टश्रम् । तथा च आदिसर्गे एवैतेषां सर्वेषां सृष्टिः ।
नैमित्तिकप्रलयोत्तरन्तु न सर्वेषाम् किन्तु येषांमेव
नाशस्तेषामेव कतिपयानामिति भेदः ।
बीजाङ्कुरवत् सृष्टेः प्रवाहरूपेणानादित्वेऽपि एतत्सृष्टेः सा-
दित्वमपि तत्तद्बीजव्यक्तेरङ्कुरव्यक्तेश्च यथा सादित्वमेवमेव
वर्त्तमानब्रह्मण आदिसर्गकाले महदादेरुत्पत्तेरादिसर्ग-
त्वमवगन्तव्यम्“यथेदानीमित्यादि” भागवतवचनेन“सूर्य्याच-
न्द्रमसौ धाता यथापूर्व्वमकल्पयदिति” मन्त्रलिङ्गेन च
प्रवाहस्यैवानादित्वं सूचितं न तु तत्तद्व्यक्तेः । कर्म्मसापेक्ष
स्यैव ईश्वरस्य स्रष्टृत्वोक्तेः पूर्वं कर्म्मणामभावे विचित्रसृष्ट्य-
सम्भवः । अन्यथा वैषम्यनैर्घृण्ये ईश्वरस्य प्रसज्ये-
याताम् जीवस्य च कृतहान्यकृताभ्यागमप्रसङ्गश्चेति दिक् ।

**आदीनव** पु० आ+दी—भावे क्त आदीनस्य वानं प्राप्तिः वा०क
१दोषे,२क्लेशे,च । कर्मणि क । ३दुर्दर्शे ४परिक्लिष्टे च त्रि० ।

**आदीपक** त्रि० आदीपयति अन्यगृहमग्निना आ+दीप—
णिच्—ण्वुल् । १परगृहस्य दाहके । “राज्ञोबधं चिकी-
र्षेद्यस्तस्य चित्रो बधो भवेत् । आदीपकस्य स्तेनस्य वर्णसङ्क-
रिकस्य च” भा०शा०८६अ० । २उद्दीपके च ।

**आदीपन** न० आ+दीप—णिच्—ल्युट् । तण्डुलादिचूर्णमि-
श्रितजलेन गृहादौ १चित्राकारलेपनभेदे (आलिपना)
२उद्दीपने च । [ क्तनादौ । २उद्दीपिते च ।

**आदीपित** त्रि० आ+दीप—णिच्—क्त । दत्तादीपने १गृहा-

**आदृरि** त्रि० आ+दृ—अन्तर्भूतण्यर्थे कि । दारयितरि “वामं
वामं त आदुरे देवोददात्वर्यमा” ऋ० ४,३०,२४ ।
“हे आदुरे ! शत्रूणां दारयितः !” भा० ।

**आदृत** त्रि०आ+दृ-कर्त्तरि क्त । १सादरे कृतादरे । कर्म्मणि
क्त । यस्यादरः कृतस्तस्मिन् २सम्मानिते ३पूजिते च ।

**आदृत्य** त्रि०आ+दृ—कर्म्मणि क्यप् । आदरणीये १आदर्त्तव्ये ।
ल्यप् ।२सम्मान्येत्यर्थे अव्य० ।

**आदृष्टि** स्त्री प्रा०स० । त्रिविभागसंकोचितदृष्टौ ।

**आदेय** त्रि०आ+दा-यत् । ग्राह्ये । “पञ्चाशद्भाग आदेयो
राज्ञा पशुहिरण्ययोः” “अनादेयस्य चादानादादे
यस्य च वर्ज्जनात्” इति च मनुः ।

**आदेवक** त्रि० आदीव्यति आ+दिव—ण्वुल् । द्यूतकारके

**आदेवन** न० आ+दिव—भावे ल्युट् । १द्यूतक्रीड़ायाम्
करणे ल्युट् । २द्यूतसाधने पाशकादौ । आधारे ल्युट् ।
द्यूतक्रीड़ाधारे (छक) ३द्यूतफलके ।

**आदेश** पु०आ+दिश-भावे घञ् । १उपदेशे २आज्ञायाम् “अथात
आदेशोनेति नेतीति”वृ०उ०“उत तमादेशमप्राक्ष्यः” “उत
स क आदेशः” । “आदित्योब्रह्मेत्यादेश” इति च छा०उ०
“आदेशं देशकालज्ञः शिष्यः शासितुरानतः”रघुः व्याकरण-
प्रसिद्धे कस्यचित् वर्णादितः ३कस्यचिद्वर्णस्योत्पत्तौ च । आ-
दिश्यते कर्म्मणि घञ् । ४आदिष्टे ५कथिते ६उपदिष्टे क-
स्यचित् स्थाने जाते कस्मिंश्चिद्वर्णे च“धातोः स्थान इवादेशं
सुग्रीवं सन्न्यवेशयत्”रघुः “आदेशप्रत्ययोः”पा०“आग-
मादेशयोर्मध्ये बलीयानागमोविधिः”व्या०कारि०“स्थानि-
वदादेशोऽनल्विधौ”पा० “लोपोऽप्यादेशउच्यते” व्या०
का०“ज्योतिर्विदुयुक्ते ८शुभाशुभफले च“नादेशास्तस्य निष्-
फलाः” वृहत्सं० । [ कारके २आज्ञाकारके ।

**आदेशक** त्रि० आदिशति आ+दिश+ण्वुल् । १आदेश-

**आदेशन** न० आ+दिश-भावे ल्युट् । आदेशे “कृतोपनयन-
स्यास्य व्रतादेशनमिष्यते” मनुः ।

**आदेशिन्** त्रि० आदिशति आ—दिश—णिनि । १आदेश-
कारके“कपोलपाटलादेशि बभूव रघुचेष्टितम्”रघुः २दैवज्ञे
गणके पु० हेम० । [ ३कथनीये च ।

**आदेश्य** त्रि०आ+दिश—कर्मणि ण्यत् । १उपदेश्ये २आज्ञाप्ये

**आदेष्टृ** पु० आ+दिश—तृच् । ऋत्विजं प्रति ममेष्टसम्पा-
दनार्थं कर्म क्रियतामित्यादेशकर्त्तरि १यजमाने, २आज्ञा
कर्तृमात्रे त्रि० स्त्रियां ङीप् ।

**आद्य** त्रि० आदौ भवः दिगा०यत् । १आदिभवे । “एत-
दन्ताश्च गतयो ब्रह्माद्याः समुदाहृताः” । “स्वायम्भु
वाद्याः सप्तैते मनवो भूरितेजसः”मनुः । अशौचान्त द्विती-
यदिनकर्त्तव्ये २प्रेतश्राद्धभेदे न० “मृताहनि तु कर्त्तव्यं
प्रतिमासन्तु वत्सरम् । प्रतिसंवत्सरं चैवमाद्यमेकादशे-
ऽहनि” या०स्मृ० । तस्य षोड़शश्राद्धानामादिभूतत्वात्
आद्यत्वम् । “श्राद्धमग्निमतः कुर्य्याद्दाहादेकादशेऽहनि ।
ध्रुवाणि तु प्रकुर्व्वीत प्रमीतानां च सर्व्वदा । द्वादश प्रति-
मास्यानि आद्यं षाण्मासिके तथा । सपिण्डीकरणञ्चैव इत्ये-
तत् श्राद्धषोड़श” छन्दो ग०प० । निरग्नेस्तु मरणावध्येव-
एकादशाहे तत् कर्त्तव्यमिति भेदः । एकादशपदञ्च स्वजा-
त्युक्ताशौचान्तद्वितीयदिनपरम् । ३प्रधाने श्रेष्ठे त्रि०
“आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव” रघुः
अद+कर्मणि ण्यत् । ४अदनीयद्रव्यमात्रे त्रि० ५धान्ये
न० राजनि० तस्यादनीयत्वात् “अन्नमूलं हि जीवनम्”
इत्युक्तेश्च जीवनमूलत्वेन प्रधानत्वाद्वा आद्यत्वम् ।[स्त्रीकौ च

**आद्यकवि** पु०कर्म० । आदिकवौ चतुर्मुखे १हिरण्यगर्भे २वा-